International Journal of Sanskrit Research 2020; 6(2): 08-11

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 08-11
© 2020 IJSR
www.anantaajournal.com
Received: 06-01-2020
Accepted: 10-02-2020

**Dr. Naveen Bhat**
Uppinapattana, Lecturer in Sanskrit, MIMS & MIPU College Banglore, Karnataka, India

**Corresponding Author:**
**Dr. Naveen Bhat**
Uppinapattana, Lecturer in Sanskrit, MIMS & MIPU College Banglore, Karnataka, India

# नन्दिकेश्वरः तस्य अभिनयदर्पणञ्च” एकं विमर्शात्मकमध्ययनम्

**Dr. Naveen Bhat**

## प्रस्तावना

भारतीय-नाट्यशस्त्रीय-परम्परायाम् अभिनयदर्पणस्य प्रमुखं स्थानं वर्तते। भरतमुनेः नाट्यशास्त्रग्रन्थस्य नाट्यपरम्परा या वर्तते तस्य परिवर्धनं विधद्वयेन अभवत्। एकम् अभिनवगुप्तादिटीकाकारैः टीकाद्वारा अन्यत् नन्दिकेश्वर-धनञ्जयादिभिः ग्रन्थरचनाद्वारा च। नाट्यशास्त्रमनुसृत्य रचितेषु ग्रन्थेषु नन्दिकेश्वरस्य “अभिनयदर्पणम्” प्रमुखं वर्तते। अभिनयमधिकृत्य तत्रापि आङ्गिकाभिनयमधिकृत्य रचितो वर्ततेऽयं ग्रन्थः। यद्यपि भरतमुनेः नाट्यपरम्परामधिकृत्यैव ग्रन्थोऽयं रचितः तथापि नाट्याशास्त्रादधिकम् अभिनयस्य प्रायोगिकविवरणं ददात्यभिनयदर्पणम्। स्वतन्त्रदिशा अभिनयस्य विवरणं प्रयच्छन् अयं ग्रन्थः लोकप्रियतां चावाप। अद्यापि भरतनाट्यादिनृत्याभ्यासकर्तारः अभिनयविषये अभिनयदर्पणस्य श्लोकान् कण्ठस्थीकुर्वन्तीति विचारः ग्रन्थस्यास्य महत्त्वं द्योतयति।

## नन्दिकेश्वराचार्यः तस्य देशकालकृतयश्च।

भरतार्णवम् अभिनयदर्पणं चेति ग्रन्थद्वयेन नाट्यशास्त्रीयपरम्परायां नन्दिकेश्वरस्य नाम आचार्यत्वेन प्रख्यातमस्ति। किन्तु तस्य विषये अधिकं वक्तुं विद्वांसः अपि शक्ताः न सन्ति। बहवः साक्ष्याभावेन मौनमेवावलम्बन्ते। ये तस्य देशकालकृतीः अधिकृत्य वक्तुमारभन्ते तेष्वपि एकाभिप्रायः नास्ति।

१८९४तमे वर्षे मुम्बै-नगर्यां निर्णयसागर-मुद्रणालये मुद्रिते, पण्डितशिवदत्त-काशीनाथपाण्डुरङ्गपराब-महोदयाभ्यां सम्पादिते नाट्यशास्त्रग्रन्थे अन्तिमपुष्पिकायां “समाप्तश्चायं ग्रन्थः नन्दिभरतसङ्गीतपुस्तकम्” इति लिखितमस्ति। केचित् “नन्दिभरत[1]” इति शब्दस्य आधारेण नन्दिकेश्वरं भरतात् पूर्ववर्तीति वदन्ति।

किन्तु नन्दिकेश्वरः एव अभिनयदर्पणे नाट्योत्पत्तेः परम्पराकथनसमये भरतस्य नाम गृह्णाति। तदेवम् –

नाट्यवेदं ददौ पूर्वं भरताय चतुर्मुखः।
ततश्च भरतः सार्धं गन्धर्वाप्सरसां गणैः ॥[2] इति।

[1] ना. शा. काव्यमाला निर्णयसागरम् ।

[2] अ.द. शो-२

अतः अनेन नन्दिकेश्वरस्य भरतपूर्ववर्तित्वकल्पनं निरस्यते। अभिनयदर्पणस्य प्रकाशनात् पूर्वं केचित् नन्दिनं भरतं च एकव्यक्तित्वेनापि गृह्णन्ति स्म। किन्तु तयोः प्रथक्त्वमुक्तं काव्यमीमांसायां राजशेखरेण शास्त्रसङ्ग्रहेऽति प्रथमेऽध्याये – "रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः[3]" इति। नाट्यशास्त्रस्य चतुर्थेऽध्याये अङ्गहाराणां विवरणसमये तण्डुः इति नाम गृहीतम्। तदेवम्-

प्रयोगमङ्गहाराणामाचक्ष्व सुरसत्तम।
ततस्तण्डुं समाहूय प्रोक्तवान् भुवनेश्वरः ॥
प्रयोगमङ्गहाराणामाचक्ष्व भरताय वै।
ततो ये तण्डुना प्रोक्तास्त्वङ्गहारा महात्मना ॥[4] इति।

अत्रोक्तः तण्डुरेव नन्दिकेश्वरः इति केचित्। किन्तु नन्दिकेश्वरेणैव अभिनयदर्पणे एव

"तण्डुना स्वगणाग्रण्या भरताय न्यदीदिशत्"[5]

इति तण्डोः नाम गृहीतम्। अतः नन्दिकेश्वर एव तण्डुरित्यनुचितं कल्पनम् इति वक्तुं शक्नुमः।
मतङ्गमुनेः बृहद्देशी इति ग्रन्थे मूर्छना विवरणे नन्दिकेश्वरस्य मतमुल्लेखितम्। तदेवम् –

" नन्दिकेश्वरेणाप्युक्तम्-
द्वादशस्वरसम्पन्ना ज्ञातव्या मूर्छना बुधैः।
जातिभावादिसिद्ध्यर्थं तारमन्द्रादि सिद्धये॥[6] " इति।

सङ्गीतशास्त्रज्ञः नन्दिकेश्वर एव अभिनयदर्पणस्य कर्ता आसीच्चेत् अस्य कालः चतुर्थशतकम् भवितुमर्हति यतः बृहद्देश्याः कालः पञ्चमशतकमिति पण्डिताः मन्यन्ते।
सङ्गीतरत्नाकरेऽपि नन्दिकेश्वरस्य नाम सङ्गीताचार्यरूपेण उक्तम् –

आञ्जनेयो मातृगुप्तो रावणो नन्दिकेश्वरः।
स्वातिर्गणो बिन्दुराजः क्षेत्रराजश्च राहलः ॥[7] इति ॥

सङ्गीतरत्नाकरस्य कालः त्रयोदशशतकमिति मन्यन्ते। अतः तत्पूर्वे एव नन्दिकेश्वरः आसीदिति मनमोहनघोषमहाभागः अभिप्रैति। अभिनयदर्पणे दशावताराणाम् अभिनयानां विवरणे बुद्धावतारस्य उल्लेखः नास्ति। अस्मिन् विषये विकल्पद्वयं भवितुमर्हति। प्रथम् – नन्दिकेश्वरः बौद्धमतविरोधी स्यात्। द्वितीम् - विष्णोः दशावतारेषु बुद्धस्य स्थानकल्पनात् पूर्वम् एव अभिनयदर्पणस्य रचना भवेत्। बौद्धावतारस्य उल्लेखः मत्स्यपुराणे तथा भागवतपुराणे च प्राथम्येन दृश्यते। मत्स्यपुराणस्य कालः षष्ठशतकम् अपि च भागवतपुराणस्य तदनन्तरमिति विद्वांसः मन्यन्ते। अतः द्वितीयमताङ्गीकारे नन्दिकेश्वरस्य कालः तपूर्वमिति सिद्ध्यति।

अभिनयदर्पणस्य आदावेव नाट्योत्पत्तेः तथा नाट्यपरम्परायाः कथनसमये भरतस्मुनेः नाम एवमुल्लिखितम्-

नाट्यवेदं ददौ पूर्वं भरताय चतुर्मुखः।
ततश्च भरतः सार्धं गन्धर्वाप्सरसां गणैः ॥[8] इति॥

किन्तु नाट्यशास्त्रे एकत्रापि अभिनयदर्पणस्य नाम नास्ति। यद्यपि अभिनयस्य प्रायोगिकविवरणं नाट्यशास्त्रापेक्षया अभिनयदर्पणे अधिकं वर्तते तथापि ग्रन्थद्वयस्य अध्ययनेन अभिनयदर्पणस्योपरि नाट्यशास्त्रस्य प्रभावः अस्तीत्यवगम्यते। अतः नन्दिकेश्वरः शिवस्य वाहनरूपेण पुराणेषूक्तः नन्दी इत्यसत्कल्पना नाङ्गीकार्यः। नन्दिकेश्वरः भरतादनन्तरवर्ती कश्चित् नाट्यशास्त्रविपश्चिदिति कथनमेव युक्तम्।
नन्दिकेश्वरस्य नाम शास्त्रकारत्वेन अनेकत्र उल्लिखितम्। मतङ्गशाङ्र्गधरादिभिः अस्य नाम सङ्गीताचार्यत्वेन उक्तम्। किन्तु सङ्गीतशास्त्रे अनेन रचिताः ग्रन्थाः न लभ्यन्ते। अभिनयदर्पणस्य कर्ता नन्दिकेश्वरः एव मतङ्गशाङ्र्गधरादिभिः उक्तः नन्दिकेश्वरः इति कथनं समीचीनं न भवति[9]।
विपर्यासोऽयमस्ति यत्, न कोऽपि प्रसिद्धः नाट्यशास्त्रीयग्रन्थकर्ता नन्दिकेश्वरस्य नाम नाट्याचार्यत्वेन न वक्ति। किन्तु भरतार्णवम् अभिनयदर्पणमिति द्वौ नाट्यशास्त्रीयग्रन्थौ नन्दिकेश्वरस्य नाम्नि वर्तेते। नन्दिकेश्वरः भरतस्य तथा तण्ड्वादीनां भरतपूर्विकाणां नाट्याचार्याणां नाम उल्लिखति नार्वाचीनानाम्। अतः नन्दिकेश्वरस्य कालविषये वक्तव्यं चेत् सः भरतकालादनन्तरवर्तीति कथनं साधु।

[3] का.मी अ-१ पृष्टसङ्ख्या-१
[4] ना.शा. अ-४ श्लो-१७,१८।
[5] अ.द. श्लो-४
[6] बृ.दे. पृ.सं – ३२।
[7] सं.र. अ-१ श्लो-१७
[8] अ.द. श्लो-२
[9] शाङ्र्गधरेण नन्दिकेश्वरस्य नाम रावणाञ्जनेयाभ्यां सह उक्तम्। अतः सह नन्दिकेश्वरः शिवस्यवाहनमपि भवितुमर्हति।

दक्षिणे भारते नन्दिनं देवातारूपेण पूजयन्ति। अपि च नन्दिकेश्वरेति नामकरणं दक्षिणभारते अद्यापि दृश्यते[10]। संस्कृतभाषायां अभिनयदर्पणस्य प्रकाशनं येन मनमोहनघोषमहोदयेन कृतं तेन ग्रन्थसम्पादनसमये तेलगूलिप्यामेव अधिकाः हस्तप्रतयः प्राप्ताः। अतः तस्य देशविषये वक्तव्यं चेत् सः दाक्षिणात्यः इति वादः साधुरिति मम मतम्।

नन्दिकेश्वरस्य नाम्नि एताः कृतयः सन्ति इति डा॥ पारसनाथद्विवेदी महोदयः अभिप्रैति[11] -

1. नन्दिकेश्वरसंहिता
2. अभिनयदर्पणम्
3. भरतार्णवः
4. नन्दिकेश्वरकाशिका
5. रुद्रडमरूद्भवसूत्रविवरणम्
6. नन्दिभरतम्
7. भरतार्थचन्द्रिका
8. താललक्षणम्-तालादिलक्षणम्-तालाभिनयलक्षणम्
9. नन्दिकेश्वरतिलकम्
10. योगतारावली
11. प्रभाकरविजयम्
12. लिङ्गधारणचन्द्रिका

किन्तु एक एव नन्दिकेश्वरः एताः कृतीः अरचयदिति वक्तुं तेन आधारः न दत्तः। अपि च तेनोक्ते रुद्रडमरूद्भवसूत्रविवरणम् इति ग्रन्थे ६०तमे श्लोके [12]-

षडङ्गानि च प्रोक्तानि नन्दिना भरतेन च।
गृहस्ताले समोऽतीतोऽनागतश्च त्रिधा मतः ॥

इत्युक्तम्। अत्र नन्दिना भरतेन च इति वाक्येनावगम्यते यत् ग्रन्थोऽयं नन्दिकेश्वर कृतं न किन्तु भरतनन्दिकेश्वरयोः कस्यचित् अनुयायिनः इति। अतः सर्वाः एताः कृतयः एकस्यैव नन्दिकेश्वरस्य भवितुं नार्हन्ति।

## अभिनयदर्पणस्य प्रकाशनम्

अभिनयदर्पणस्य प्रकाशनविषये त्रयाणां महोदयानां नाम उल्लेखनीयम्। ते नीडामङ्गलं-तिरुवेङ्कटाचार्याः, आनन्द-कूमारस्वामिनः, मनमोहनघोषमहाभागाश्च।

## नीडामङ्गलं-तिरुवेङ्कटाचार्या

अभिनयदर्पणस्य प्रकाशनम् ऐदम्प्राथम्येन तेलगू-लिप्यां श्री नीडामङ्गलं-तिरुवेङ्कटाचार्य-महोदयेन मद्रास्-नगर्यां क्रि.श. १८८७तमे वर्षे प्रकाशितम्। संस्कृतश्लोकाः तेलुगू-लिप्याम् अस्मिन् पुस्तके मुद्रिताः तथा श्लोकानां तेलगू-भाषान्तरमपि प्रदत्तम्। अस्य ग्रन्थस्य भूमिकावलोकनेन अवगम्यते यत् तिरुवेङ्कटाचार्यवर्याणाम् उद्देश्यम् अभिनयदर्पणस्य प्रकाशनं नास्ति किन्तु असंस्कृतज्ञ-तेलगुभाषिकेभ्यः अभिनयस्य शास्त्रीयज्ञानप्रदानम्। अतः एव अभिनयदर्पणस्य श्लोकैः सह ग्रन्थान्तरस्थानामपि श्लोकानम् अनुवादः अत्र वर्तते। आहत्य ४०८ श्लोकाः अस्मिन् ग्रन्थे तेलगू-अनुवादसहिताः सन्ति। विशेषः इदमस्ति यत्, ग्रन्थादौ मङ्गलश्लोकादनन्तरम् इन्द्र-नन्दिकेश्वरयोः संवादः विलिखितः। शिरोभेदाः, दृष्टिभेदाः, ग्रीवाभेदाः, असंयुतहस्ताः, संयुतहस्ताः, बान्धवहस्ताः, देवताहस्ताः, नवग्रहहस्ताः, दशावतारहस्ताः, चातुर्वर्णहस्ताः, समुद्रहस्ताः, पुण्यनदीनां हस्ताः, सिंहादिमृग-हस्ताः, पक्षिहस्ताः, जलजन्तु-हस्ताः चात्र विवृताः।

## आनन्दकुमारस्वामिन

"The Mirror of Gesture" इत्याख्यं ग्रन्थम् आनन्दकूमारस्वामिनः गोपालकृष्णय्यदुग्गिरालमहोदयेन सह १९१७तमे इसवीये वर्षे लण्डन्-नगरस्थिते केम्ब्रिड्ज् हार्वोर्ड् विश्वविद्यालयस्य मुद्रणालये प्रकाशितवन्तः। अनुवादोऽयं पूर्वोक्तस्य तेलगूलिप्याम् लभ्यमानस्य अभिनयदर्पणस्यैव वर्तते इति प्रकाशकेनैवोऽक्तम् [13]। पाश्चात्यराष्ट्रेष्वपि भारतीय-नाट्यशास्त्रीय-ग्रन्थानां महत्त्वं प्रदीपयन् ग्रन्थोऽयं अभिनयदर्पणस्य प्रकाशनेषु अद्यापि गौरवं भजते।

## मनमोहनघोषमहाभागा

१९३४तमे वर्षे अभिनयदर्पणस्य मूलश्लोकाः देवनागर्यां मनमोहनघोष-महाभागेन कल्कत्ता-नगर्यां "Metropolitan Printing & Publishing House Limited" इति प्रकाशने प्रकाशितम्। सः द्वे पूर्णे तिस्रः अपूर्णाः हस्तप्रतीः संशोध्य ग्रन्थसम्पादनं कृतवानिति विशेषः। अस्यां कृतौ ३२४श्लोकाः सन्ति यत्र इन्द्र-नन्दिकेश्वरयोः संवादः नास्ति। ग्रन्थान्तरश्लोकरहिताः देवनागरीलिपिलिखिताः मूलश्लोकाः अद्यापि संस्कृतज्ञेभ्यः अभिनयदर्पणस्य अध्ययनाय आकरग्रन्थः वर्तते। अपि च आङ्ग्ल-भाषायां विस्तृतपीठिकायुतः तथा आङ्ग्लानुवादसहितः अयम् अमूल्यग्रन्थः संशोधनात्मको वर्तते। मण्डलानि, स्थानकानि, उत्प्लवनं, भ्रमरी, चारी चात्र तेलगूप्रत्यापेक्षया अधिकं

---

[10] अहमपि दाक्षिणात्यः कर्नाटकस्थः च । मम ग्रामे नन्दिकेश्वर इति नाम्ना अनेके जनाः अद्यापि सन्ति ।

[11] आचार्य नन्दिकेश्वर और् उनका नाट्यसाहित्य पृ.सं-१०५

[12] "आचार्यनन्दिकेश्वर और् उनका नाट्यसाहित्य" ग्रन्थस्य परिशिष्टे एव "रुद्रडमरूद्भवसूत्रविवरणम्" दत्तम् ।

[13] " It remains to be said that our translation is based upon a Nagari transcript of the second Telagu edition of the " Abhinaya Darpana" of nandikeshvara, published under the editorship of the late Tiruvenkatacari of Nidamangalam." – The mirror of gesture. Page-10

संशोधनम् वर्तते। अनेनैव महाभागेन १९५७तमे वर्षे “Firma K.L. Mukhopadhyay. Calkatta” इति प्रकाशने ग्रन्थस्यास्य द्वीतीयमुद्रणं कृतम्।

**अभिनयदर्पणस्य ग्रन्थसार**

अभिनयदर्पणस्य पूर्वोक्तेषु त्रिषु प्रकाशनेषु मनमोहनघोषमहाभागेन सम्पादितमेव अध्ययनयोग्यं वर्तते; अन्येषु ग्रन्थेषु ग्रन्थान्तरश्लोकबाहुल्यात्। अतः तदनुसृत्यैव ग्रन्थसारः लिख्यते। नन्दिकेश्वरेण चतुर्विधाभिनयनाम्नैव मङ्गलं कृतमेवम्-

आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम्।
आहार्यं चन्द्रतारादि तन्नुमः सात्त्विकं शिवम् ॥ इति।[14]

तेलुगु-लिप्यां नीडामङ्गलं-तिरुवेङ्कटाचार्येण ऐदम्प्राथम्येन मुद्रिते ग्रन्थे मङ्गलश्लोकानन्तरम् इन्द्रनन्दिकेश्वरयोः संवादः वर्तते। अस्मिन् संवादे नन्दिकेश्वरस्य भरतार्णवमिति ग्रन्थस्य सङ्क्षिप्तरूपमेव अभिनयदर्पणमित्युक्तम्। यद्यपि घोष्-महाभागः संवादमिमं प्रक्षिप्तमिति परिगृह्णाति तथापि अध्ययनात्मकत्वेन एते श्लोकाः अपि दीयन्ते –

कैलासाचलवासाय करुणारससिन्धवे।
नमोऽस्तु नन्दिकेशाय नाट्यशास्त्रार्थदायिने ॥
स्वागतं ते सुराधीश कुशलं त्रिदिवौकसाम्।
किमर्थमागतं ब्रूहि भवता मम सन्निधौ ॥
त्वदीयकृपया पूर्वं नाट्यशालामलङ्कृताम्।
त्वदीयनर्तकस्सोऽयं त्वत्कृपामभिवाञ्छति ॥
मया विधेयं किं तस्य वद वासव तत्त्वतः।
दैतेय नाट्यशालायां नर्तको नटशेखरः ॥
तं विजेतुमयं नाट्यविनोदैः क्रमवेदिभिः।
भवद्भिरचितं ग्रन्थं भरतार्णवमिच्छति ॥
चतुस्सहस्रसङ्ख्याकैः ग्रन्थैश्च परि पूरितम्।
भरतार्णवशास्त्रं तु सुमते शृणु सादरम् ॥
नन्दिकेश दयामूर्ते विस्तरं संविहाय मे।
सङ्क्षिप्य नाट्यशास्त्रार्थं क्रमपूर्वमुदाहर ॥
वदामि सुमते देव सङ्क्षिप्य भरतार्णवम्।
दर्पणाख्यमिदं सूक्ष्ममवधारय सादरम् ॥[15]इति।

भरतमुनेः परम्परामनुसृत्यैव नाट्योत्पत्तिः वेदादेव इत्युक्त्वा नाट्यप्रशंसापि कृता। अभिनयमधिकृत्य विवरणात् पूर्वम् – नाट्यनृत्यनृत्तानां विचारः, सभापतिलक्षणम्, मन्त्रिलक्षणम्, सभारचना, पात्रलक्षणम्, वर्जनीयपात्राणि, पात्रस्यप्राणाः, किङ्किणीलक्षणम्, प्रार्थना, रङ्गाधिदेवतास्तुतिः, पुष्पाञ्जलिः, नाट्यक्रमः च विवृताः।

**अभिनयसम्बद्धाः विषयाः एवं विवृता**

1. शिरोभेदाः
2. दृष्टिभेदाः
3. ग्रीवाभेदाः
4. हस्तभेदाः :- संयुताः असंयुताश्च।
5. देवताहस्ताः
6. दशावतारहस्ताः
7. तत्तज्जातीयहस्ताः
8. बान्धवहस्ताः
9. नवग्रहहस्ताः
10. पादभेदाः
11. मण्डलभेदाः
12. स्थानकभेदाः
13. उत्प्लवनभेदाः
14. भ्रमरीभेदाः
15. चारीभेदाः
16. गतिभेदाः

इत्थं ग्रन्थोऽयं नाट्यशास्त्रीयपरम्परायां प्रायोगिकमहत्त्वं प्राप्तवानस्ति। अद्यापि भरतनृत्यस्य(भरतनाट्यमिति प्रसिद्धम्) पाठ्यक्रमे अस्य ग्रन्थस्य सम्पूर्णमध्ययनं विधीयते। श्लोकाः अवगन्तुं सुलभाः, प्रायः अनुष्टुप् छन्दोयुताश्च सन्ति। अतः अध्ययनसौकर्यमपि त्रिशताधिकश्लोकयुते ग्रन्थेऽस्मिन् वर्तते।

**संदर्भ**


1. अभिनयदर्पणम् (तेलगुलिपिः), नन्दिकेश्वरः / नीडामङ्गलं तिरुवेङ्कटाचार्यः, द इम्प्रेस् ओफ् इण्डिया, मद्रास्, १८८७
2. अभिनयदर्पणम् (मूलम् आङ्ग्लानुवादश्च), नन्दिकेश्वर/मनमोहनघोषः, मेट्रोपोलिटिन् प्रिण्टिङ्ग् एण्ड् पब्लिशिङ्ग् हौस्, कल्कत्ता, १९३४
3. अभिनयदर्पणम् (मूलम् आङ्ग्लानुवादश्च), नन्दिकेश्वर/मनमोहनघोषः, फर्मा के एल् मुखोपाध्याय पब्लिकेशन्, कल्कत्ता, १९५७
4. अभिनयदर्पणस्य आङ्ग्लानुवादः Dance Gestures, Mirror of Expressions, पि रामचन्द्रशेखरः, गिरि ट्रेडिङ्ग् एजेन्सि, २०१४
5. The Mirror of Gesture, Ananda Coomarasvami, Cambridge Howard University Press, 1917


14 श्लोकोऽयं सङ्गीतरत्नाकरस्य सप्तमे नर्तनाध्यायेऽपि मङ्गलश्लोकत्वेन वर्तते । किन्तु सङ्गीतरत्नाकरः अभिनयदर्पणात् पश्चाद्रचितः इति पूर्वे एव साधारमुक्तम् । अतः अभिनयदर्पणस्य श्लोकः एव अत्र पुनरुक्तः इत्येव साधुवादः ।

15 अ.द.( तेलगुलिपिः)